# શ્રી મ્રિત્યુજય માનસિક પૂજ સ્તોત્રમ

કૈલાસે કમનીયરત્નખચિતે કલ્પદ્રુમૂલે સ્થિતં
કર્પૂરસ્ફટિકેન્દુસુન્દરતનું કાત્યાયનીસેવિતમ્ ।
ગઙ્ગાતુઙ્ગતરઙ્ગરજિતજટાભારં કૃપાસાગરં
કણ્ઠાલંકૃતશેષભૂષણમમું મૃત્યુજયં ભાવયે ।। ૧।।
આગત્ય મૃત્યુજય ચન્દ્રમૌલે
વ્યાઘ્રાજિનાલંકૃત શૂલપાણે ।
સ્વભક્તસંરક્ષણકામધેનો
પ્રસીદ વિશ્વેશ્વર પાર્વતીશ ।। ૨।।
ભાસ્વન્મૌક્તિકતોરણે મરકતસ્તમ્ભાયુધાલંકૃતે
સૌધે ધૂપસુવાસિને મણિમયે માણિક્યદીપાચિતે ।
બ્રહ્મેન્દ્રામરયોગિપુઙ્ગવગણૈર્યુક્તે ચ કલ્પદ્રુમૈઃ
શ્રીમૃત્યુજય સુસ્થિરો ભવ વિભો માણિક્યસિંહાસને ।। ૩।।
મન્દારમલ્લીકરવીરમાધવી-
પુન્નાગનીલોત્પલચમ્પકાન્વિતૈઃ ।
કર્પૂરપાટીરસુવાસિતૈર્જલૈ-
રાધત્સ્વ મૃત્યુજય પાદ્યમુત્તમમ્ ।। ૪।।
સુગન્ધપુષ્પપ્રકરૈઃ સુવાસિતૈ-
ર્વિયન્નદીશીતલવારિભિઃ શુભૈઃ ।
ત્રિલોકનાથાર્તિહરાર્ધ્યમાદરા-
દ્ગૃહાણ મૃત્યુજય સર્વવન્દિત ।। ૫।।
હિમામ્બુવાસિતૈસ્તોયૈઃ શીતલૈરતિપાવનૈઃ ।
મૃત્યુજય મહાદેવ શુદ્ધાચમનમાચર ।। ૬।।
ગુડદધિસહિતં મધુપ્રકીર્ણં
સુઘૃતસમન્વિતધેનુદુગ્ધયુક્તમ્ ।
શુભકરમધુપર્કમાહર ત્વં

ત્રિનયન મૃત્યુહર ત્રિલોકવન્દ્ય ।। ૭।।
પચાસ્ત્ર શાન્ત પચાસ્ય પચપાતકસંહર ।
પચામૃતસ્નાનમિદં કુરુ મૃત્યુજય પ્રભો ।। ૮।।
જગત્રયીખ્યાત સમસ્તતીર્થ-
સમાહૃતૈઃ કલ્મષહારિભિશ્ચ ।
સ્નાનં સુતોયૈઃ સમુદાચર ત્વં
મૃત્યુજયાનન્દગુણાઅભિરામ ।। ૯।।
આનીતેનાતિશુભ્રેણ કૌશેયેનામરદ્રુમાત્ ।
માર્જયામિ જટાભારં શિવ મૃત્યુજય પ્રભો ।। ૧૦।।
નાનાહેમવિચિત્રાણિ ચીરચીનામ્બરાણિ ચ ।
વિવિધાનિ ચ દિવ્યાનિ મૃત્યુજય સુધારય ।। ૧૧।।
વિશિદ્ધમુક્તાફલજાલરમ્યં
મનોહરં કાચનહેમસૂત્રમ્ ।
યજ્ઞોપવીતં પરમં પવિત્ર-
માધત્સ્વ મૃત્યુજય ભક્તિગમ્ય ।। ૧૨।।
શ્રીગન્ધં ઘનસારકુઙ્કુમયુતં કસ્તૂરિકાપૂરિતં
કાલેયેન હિમામ્બુના વિરચિત્તં મન્દારસંવાસિતમ્ ।
દિવ્યં દેવમનોહરં મણિમયે પાત્રે સમારોપિતં
સર્વાઙ્ગેષુ વિલેપયામિ સતતં મૃત્યુજય શ્રીવિભો ।। ૧૩।।
અક્ષતૈર્ધવલૈર્દિવ્યૈઃ સમ્યક્તિલસમન્વિતૈઃ ।
મૃત્યુજય મહાદેવ પૂજયામિ વૃષધ્વજ ।। ૧૪।।
ચમ્પકપઙ્કજકુન્દૈઃ
કરવીરમલ્લિકાકુસુમૈઃ ।
વિસ્તારય નિજમકુટં
મૃત્યુજય પુણ્ડરીકનયનાપ્ત ।। ૧૫।।
માણિક્યપાદુકાદ્વન્દ્વે મૌનિહૃત્પદ્મમન્દિરે ।

પાદૌ સદ્પદ્મસદૃશૌ મૃત્યુજય નિવેશય ।। ૧૬।।
માણિક્યકેયૂરકિરીટહારૈઃ
કાચીમણિસ્થાપિતકુણ્ડલૈશ્ચ ।
મજીરમુખ્યાભરણૈર્મનોજ્ઞૈ-
રઙ્ગાનિ મૃત્યુજય ભૂષયામિ ।। ૧૭।।
ગજવદનસ્કન્દધૃતે-
નાતિસ્વચ્છેન ચામરયુગેન ।
ગલદલકાનનપદ્મં
મૃત્યુજય ભાવયામિ હૃત્પદ્મે ।। ૧૮।।
મુક્તાતપત્રં શશિકોટિશુભ્રં
શુભપ્રદં કાજનદણ્ડયુક્તમ્ ।
માણિક્યસંસ્થાપિતહેમકુમ્ભં
સુરેશ મૃત્યુજય તેઽર્પયામિ ।। ૧૯।।
મણિમુકુરે નિષ્પટલે
ત્રિજગદ્ગાઢાન્ધકારસપ્તાશ્વે ।
કન્દર્પકોટીસદૃશં
મૃત્યુજય પશ્ય વદનમાત્મીયમ્ ।। ૨૦।।
કર્પૂરચૂર્ણં કપિલાજ્યપૂતં
દાસ્યામિ કાલેયસમાન્વિતૈશ્ચ ।
સમુદ્ભવં પાવનગન્ધધૂપિતં
મૃત્યુજયાઙ્ગં પરિકલ્પયામિ ।। ૨૧।।
વર્તિત્રયોપેતમખણ્ડદીપ્ત્યા
તમોહરં બાહ્મમથાન્તરં ચ ।
સાજ્યં સમસ્તામરવર્ગહૃદ્યં
સુરેશા  મૃત્યુજય વંશદીપમ્ ।। ૨૨।।
રાજાન્નં મધુરાન્વિતં ચ મૃદુલં માણિક્યપાત્રે સ્થિતં

હિઙ્ગૂજીરકસન્મરીચમિલિતૈઃ શાકૈરનેકૈઃ શુભૈઃ ।
શાકં સમ્યગપૂપસૂપસહિતં સદ્યોઘૃતેનાપ્લુતં
શ્રીમૃત્યુંજય પાર્વતીપ્રિય વિભો સાપોશનં ભુજ્યતામ્ ॥ ૨૩॥
કૂષ્માણ્ડવાર્તાકપટોલિકાનાં
ફલાનિ રમ્યાણિ ચ કારવલ્લ્યા ।
સુપાકયુક્તાનિ સસૌરભાણિ
શ્રીકણ્ઠ મૃત્યુંજય ભક્ષયેશ ॥ ૨૪॥
શીતલં મધુરં સ્વચ્છં પાવનં વાસિતં લઘુ ।
મધ્યે સ્વીકુરુ પાનીયં શિવ મૃત્યુંજય પ્રભો ॥ ૨૫॥
શર્કરામિલિતં સ્નિગ્ધં દુગ્ધાન્નં ગોઘૃતાન્વિતમ્ ।
કદલીફલસંમિશ્રં ભુજ્યતાં મૃત્યુસંહર ॥ ૨૬॥
કેવલમતિમાધુર્યં
દુગ્ધૈઃ સ્નિગ્ધૈશ્ચ શર્કરામિલિતૈઃ ।
એલામરીચમિલિતં
મૃત્યુંજય દેવ ભુઙ્ક્ષ્વ પરમાન્નમ્ ॥ ૨૭॥
રમ્ભાચૂતકપિત્થકણ્ઠકફલૈર્દ્રાક્ષારસાસ્વાદુમ-
ત્ખર્જૂરૈર્મધુરેક્ષુખણ્ડશકલૈઃ સન્નારિકેલામ્બુભિઃ ।
કર્પૂરેણ સુવાસિતૈર્ગુડજલૈર્માધુર્યયુક્તૈર્વિભો
શ્રીમૃત્યુંજય પૂરય ત્રિભુવનાધારં વિશાલોદરમ્ ॥ ૨૮॥
મનોજ્ઞરમ્ભાવનખણ્ડખણ્ડિતા-
ન્રુચિપ્રદાન્સર્ષપજીરકાંશ્ચ ।
સસૌરભાન્સૈન્ધવસેવિતાંશ્ચ
ગૃહાણ મૃત્યુંજય લોકવન્દ્ય ॥ ૨૯॥
હિઙ્ગૂજીરકસહિતં
વિમલામલકં કપિત્થમતિમધુરમ્ ।
બિસખણ્ડાઁલ્લાવણ્યયુતા-

મૃત્યુંજય તેઽર્પયામિ જગદીશ ।। ૩૦।।
એલાશુણ્ઠીસહિતં
દધ્યન્નં ચારુહેમપાત્રસ્થમ્ ।
અમૃતપ્રતિનિધિમાઢ્યં
મૃત્યુંજય ભુજ્યતાં ત્રિલોકેશ ।। ૩૧।।
જમ્બીરનીરાચિતશૃઙ્ગબેરં
મનોહરાનમ્લશલાટુખણ્ડાન્ ।
મૃદૂપદંશાન્સહિતોપભુઙ્ક્ષ્વ
મૃત્યુંય શ્રીકરુણાસમુદ્ર ।। ૩૨।।
નાગરરામઠયુક્તં
સુલલિતજમ્બીરનીરસંપૂર્ણમ્ ।
મથિતં સૈન્દવસહિતં
પિબ હર મૃત્યુંજય ક્રતુધ્વંસિન્ ।। ૩૩।।
મન્દારહેમામ્બુજગન્ધયુક્તૈ-
ર્મન્દાકિનીનિર્મલપુણ્યતોયૈઃ ।
ગૃહાણ મૃત્યુંજય પૂર્ણકામ
શ્રીમત્પરાપોશનમભ્રકેશ ।। ૩૪।।
ગગનધુનીવિમલજલૈ-
ર્મૃત્યુંજય પદ્મરાગપાત્રગતૈઃ ।
મૃગમદચન્દનપૂર્ણં
પ્રક્ષાલય ચારુ હસ્તપાદયુગ્મમ્ ।। ૩૫।।
પુન્નાગમલ્લિકાકુન્દવાસિતૈર્જાહ્નવીજલૈઃ ।
મૃત્યુંજય મહાદેવ પુનરાચમનં કુરુ ।। ૩૬।।
મૌક્તિકચૂર્ણસમેતૈ-
ર્મૃગમદઘનસારવાસિતૈઃ પૂગૈઃ ।
પર્ણૈઃ સ્વર્ણસમાનૈ-

મૃત્યુંજય તેઽર્પયામિ તામ્બૂલમ્ ॥ ૩૭॥
નીરાજનં નિર્મલદીપ્તિમાદ્ભિ-
ર્દીપાઙ્કુરૈરુજ્જ્વલમુચ્છ્રિતૈશ્ચ ।
ઘણ્ટાનિનાદેન સમર્પયામિ
મૃત્યુંજયાય ત્રિપુરાન્તકાય ॥ ૩૮॥
વિરિઞ્ચિમુખ્યામરવૃન્દવન્દિતે
સરોજમત્સ્યાઙ્કિતચક્રચિહ્નિતે ।
દદામિ મૃત્યુંજય પાદપઙ્કજે
ફણીન્દ્રભૂષે પુનરર્ઘ્યમીશ્વર ॥ ૩૯॥
પુન્નાગનીલોત્પલકુન્દજાતી-
મન્દારમલ્લીકરવીરપઙ્કજૈઃ ।
પુષ્પાઞ્જલિં બિલ્વદલૈસ્તુલસ્યા
મૃત્યુંજયાઙ્ઘ્રૌ વિનિવેશયામિ ॥ ૪૦॥
પદે પદે સર્વમનોનિકૃન્દનં
પદે પદે સર્વશુભપ્રદાયકમ્ ।
પ્રદક્ષિણં ભક્તિયુતેન ચેતસા
કરોમિ મૃત્યુંજય રક્ષ રક્ષ મામ્ ॥ ૪૧॥
નમો ગૌરીશાય સ્ફટિકધવલાઙ્ગાય ચ નમો
નમો લોકેશાય સ્તુતિવિબુધલોકાય ચ નમઃ ।
નમઃ શ્રીકણ્ઠાય ક્ષપિતપુરદૈત્યાય ચ નમો
નમઃ ફાલાક્ષાય સ્મરમદવિનાશાય ચ નમઃ ॥ ૪૨॥
સંસારે જનિતાપરોગસહિતે તાપત્રયાક્રન્દિતે
નિત્યં પુત્રકલત્રવિત્તવિલસત્પાશૈર્નિબદ્ધં દૃઢમ્ ।
ગર્વાન્ધં બહુપાપવર્ગસહિતં કારુણ્યદૃષ્ટ્યા વિભો
શ્રીમૃત્યુંજય પાર્વતીપ્રિય સદા માં પાહિ સર્વેશ્વર ॥ ૪૩॥
સૌધે રત્નમયે નવોત્પલદલાકીર્ણે ચ તલ્પાન્તરે

કૌશેયેન મનોહ્રેણ ધવલેનાચ્છાદિતે સર્વશઃ ।
કર્પૂરાચિતદીપદીપ્તિમિલિતે રમ્યોપધાનદ્વયે
પાર્વત્યાઃ કરપદ્મલાલિતપદં મૃત્યુજયં ભાવયે ।। ૪૪।।
ચતુશ્ચત્વારિંશદ્વિલસદુપચારૈરભિમતૈ-
ર્મનઃ પદ્મે ભક્ત્યા બહિરપિ ચ પૂજાં શુભકરીમ્ ।
કરોતિ પ્રત્યૂષે નિશિ દિવસમધ્યેઽપિ ચ પુમા-
ન્પ્રયાતિ શ્રીમૃત્યુજયપદમનેકાદ્ભુતપદમ્ ।। ૪૫।।
પ્રાતર્લિઙ્ગમુમાપતેરહરહઃ સંદર્શનાત્સ્વર્ગતં
મધ્યાહ્ને હયમેધતુલ્યફલદં સાયંતને મોક્ષદમ્ ।
ભાનોરસ્તમને પ્રદોષસમયે પચાક્ષરારાધનં
તત્કાલત્રયતુલ્યમિષ્ટફલદં સદ્યોઽનવદ્યં દૃઢમ્ ।। ૪૬।।
।। ઇતિ શ્રીમચ્છાઙ્કરભગવતઃ કૃતૌ મૃત્યુજયમાનસિકપૂજાસ્તોત્રં સંપૂર્ણમ્ ।।